नार्थत्वम्, गन्धमाल्याद्यैरित्यस्य पूजनार्थत्वम्। भात्यत्र परमेश्वर इत्यत्र राजधानीरूपदेशात्परमेश्वरपदं राजबोधकम्। चित्रभानुर्भातीत्यादौ रात्रावग्नौ दिवा सूर्ये। व्यक्तिर्लिङ्गम्। मित्रो भाति मित्रं भातीत्यादावादौ सूर्योऽन्त्ये सुहृत्। स्थूलपृषतीमित्यादौ स्वरात्तत्पुरुषबहुव्रीह्यर्थनिर्णयः॥

इति शक्तिनिरूपणम्॥

ननु लक्षणा कः पदार्थ इति चेत्,

अत्र तार्किकाः—

स्वशक्यसम्बन्धो लक्षणा। सा च द्विधा। गौणी शुद्धा च। स्वनिरूपितसादृश्याधिकरणत्वसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका गौणी। तदतिरिक्तसम्बन्धेन शक्यसम्बन्ध्यर्थप्रतिपादिका शुद्धा। प्रकारान्तरेणापि सा द्विविधा। अजहत्स्वार्था जहत्स्वार्था च। स्वार्थसंवलितपरार्थाभिधायिकाऽजहत्स्वार्था। तेन छत्रिणो यान्ति, कुन्तान् प्रवेशय, यष्टीः प्रवेशय, काकेभ्यो दधि रक्ष्यतामित्यादौ छत्रिसहितसेना—कुन्तास्त्रसहितपुरुष—यष्टिसहितपुरुष—काकसहितसर्वदध्युपघातकबोधः। स्वार्थपरित्यागेनेतरार्थाभिधायि-

---

दोषः। शङ्खचक्रसामानाधिकरण्याभावात्। *स्वरादिति*। कारिकायां स्वरादय इत्युक्तम्। तत्रादिना षत्वसत्वणत्वादिग्राह्यम्। तद्यथा—सुसिक्तमित्यत्र पूजार्थः सुः कर्मप्रवचनीयः, सुषिक्तमित्यत्रोपसर्गोऽन्यार्थः। प्रणायके प्रणयनक्रियाकर्तृत्वात्। प्रनायके प्रगतनायकदेशो वधः इत्यादि बोध्यम्।

शक्तिं निरूप्य लक्षणां निरूपयति—*नन्वित्यादिना*। स्वपदेन लाक्षणिकत्वेनाभिमतं पदं ग्राह्यम्। तथाहि—'गङ्गायां घोषः' इत्यत्र स्वं गंगापदं तच्छक्यः प्रवाहोऽर्थः, तत्सम्बन्धेन तीरोपस्थितिः। अतोऽत्र तीरे शक्तिर्न कल्प्यते। सैन्धवादौ लवणाश्वयोः परस्परसम्बन्धाभावान्नानाशक्तिकल्पनम्। यद्यपि लवणाश्वयोः संयोगोऽपि सम्भवति यत्राश्वे निक्षिप्तं लवणं, तथापि निरन्तरतत्सम्बन्धस्यैव ग्रहणतात्पर्येणार्थकथनमिति बोध्यम्। *गौणीति*। लक्ष्यमाणगुणसंबन्धस्वरूपा। यथा अग्निर्माणवक इत्यत्र। तथाहि—लक्ष्यमाणो यो गुणः शुचित्वादिः तत्सम्बन्धरूपा इत्यर्थः—शक्यसम्बन्धो लक्षणा, स च क्वचित्साक्षात्सम्बन्धः, क्वचित्परम्परासम्बन्धः, एवञ्चात्र शक्यस्याग्नेः स्वनिष्ठशुचित्ववत्त्वसम्बन्ध एव लक्षणेति। *अजहत्स्वार्थेति*। यत्र वाच्यार्थस्याप्यन्वयो भवति तत्र यथा छत्रिणो यान्तीत्यादौ। छत्र्यच्छत्रिषु गच्छत्सु बाहुल्याच्छत्रिणां छत्रिणो यान्तीत्यच्छत्रिषु यान-